**श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्**

**सत्रान्तपरीक्षा – नवम्बर/दिसम्बर, २०१६**

कक्षा – शास्त्रितृतीयवर्षम् (SEM-५) **प्रश्नपत्रम् – ६** गुणाः - ७०

विषयः – वेद: **कोड – C.C.3.5.१०** समयः – ११:०० तः २:००

दिनाङ्कः – ३०-११-२०१६ सन्दर्भग्रन्थः – अर्थसंग्रहः

---

**प्रथमान्वितिः**

**प्रश्नः -१ अधोलिखितेषु द्वयोः व्याख्या विधेया। ०८**

१. अथातो धर्मजिज्ञासा।

२. यागादिरेव धर्मः।

३. ज्ञातार्थं ज्ञानसम्बन्धं श्रोतुं श्रोता प्रवर्तते।
ग्रन्थादौ तेन वक्तव्य: सम्बन्धः सप्रयोजनः ॥

४. पुरुषप्रवृत्यनुकूलोभावयितुर्व्यापारविशेषः।

**प्रश्नः -२ यथाशास्त्रं धर्मलक्षणं निरूपयत। ०८**

**अथवा**

**अर्थसंग्रहमनुसृत्य आर्थीभावनां विवेचयत**

**प्रश्नः -३ अधोलिखितेषु द्वयोः टिप्पणीं लिखत। ०४**

१. द्वादशलक्षणी ३. अग्निना सिंचति

२. उत्पत्तिविधिः ४. विशिष्टविधिः

**प्रश्नः -४ अधोलिखितेषु पञ्चप्रश्नाः समाधेयाः। ०५**

१. 'मीमांसा' इति शब्दस्य कोऽर्थः ?

२. पूर्वमीमांसाशास्त्रस्य प्रथमसूत्रं किमस्ति?

३. कति सोमसंस्थाः ?

४. अर्थसंग्रहस्य मङ्गलाचरणे कस्य देवस्य स्तुतिर्वतते ?

५. धर्मस्य लक्षणं किम्?

६. किं नाम भावना ?

७. आर्थीभावनायाः के सन्ति अंशत्रयम्?

**द्वितीयान्वितिः**

**प्रश्नः -५ को नाम विधिः ? यथाशास्त्रं विवेचयत। ०८**

**अथवा**

**विनियोगविधेः स्वरूपं अर्थसंग्रहमनुसृत्य निरूपयत**

**प्रश्नः -६ अधोलिखितेषु द्वयोः व्याख्या विधेया। ०८**

१. अङ्गप्रधानसम्बन्धबोधको विधिः।

२. यस्य पर्णमयीजुहुर्भवति न स पापं श्लोकं श्रुणोति।

३. उभयाकाङ्क्षा प्रकरणम्

४. एकाङ्गानुवादेन विधीयमानयोरप्यङ्गयोरन्तराले विहितत्वं सन्दंश।

**प्रश्नः -७ द्वयोः टिप्पणी कार्या।** ०४

१) यागस्य रूपद्वयम् ३) दध्ना जुहोति

२) विकृतिः ४) श्रुत्यादिषट्प्रमाणानि

**प्रश्नः -८ अधोलिखितेषु पञ्च प्रश्नाः समाधेयाः।** ०५

१. 'अग्निहोत्रं जुहोति' कस्योदाहरणं वर्तते ?

२. विधेः चत्वारः भेदाः के सन्ति ?

३. अंङ्गप्रधानसम्बन्धबोधको विधेः नाम किमस्ति ?

४. श्रुत्यादिषट्प्रमाणानि कानि ?

५. श्रुतिः कति विधाः ?

६. यस्य च शब्दस्य श्रवणादेव सम्बन्धः प्रतीयते सा का ?

७. प्रकृतेः लक्षणं किम् ?

## तृतीयान्वितिः

**प्रश्नः -९ प्रयोगविधेः स्वरूपं अर्थसंग्रहमनुसृत्य निरूपयत** ०८

**अथवा**

**परिसंख्याविधिं यथाशास्त्रं वर्णयत**

**प्रश्नः -१० अधोलिखितेषु द्वयोः व्याख्या विधेया।** ०८

१. वैश्वानरं द्वादशकपालं निर्वपेत् ।

२. कर्माङ्गद्रव्याद्युद्देश्येन विधीयमनं कर्म सन्निपत्योपकारकम्

३. प्रकृतिवद्विकृतिः कर्तव्या।

४. तत्र क्रमो नाम विततिविशेषः।

**प्रश्नः -११ एकस्य टिप्पणीं लिखत।** ०२

१. पाठक्रमलक्षणम् २. क्रमस्वरूपम्

**प्रश्नः -१२ द्वयोः उत्तरं लिखत ।** ०२

१) समाख्या कति विधाः ?

२) पाठक्रमस्य लक्षणं किम् ?

३) मन्त्रपाठ-ब्राह्मणपाठयोर्विरोधे कः बलवानः ?

४) ज्योतिष्टोमे कति पशुयागाः ?

***